हन्त्यामयान् पित्तकफानिलोत्था-
न्नाड़ीगते मर्म्मगते व्रणे च ॥
ग्रन्थ्यर्व्वुदे विद्रधिराजयक्ष्मणो-
र्मेहे भगाख्ये प्रबले च योन्या ।
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे
शुक्रप्रवाहेऽप्युदरामये च ॥
भक्तस्य पूर्व्वं सततं प्रयोज्या
तक्रानुपानं त्वथ मस्तुपानम् ।
व्याजो रसो जाङ्गलजो रसो वा
पयोऽथवा शीतजलानुपानम् ॥
बलेन नागस्तुरगो जवेन
दृष्ट्या सुपर्णः श्रवणे वराहः ॥
वलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते ॥
न पानभोज्ये परिहार्य्यमस्ति
न शीतवातातपमैथुनेषु ।
शम्भुं समभ्यर्च्य कृतप्रसादे-
नाप्ता गुडी चन्द्रमसः प्रसादात् ॥”
(“मृतसूताभ्रकं लौहं नागं वङ्गं समं समम् ।
एलाबीजं लवङ्गञ्च जातीकोषफलन्तथा ॥
मधूकं मधुयष्टी च धात्री च समशर्करा ।
कर्पूरं खादिरं सारं शताह्वा कण्टकारिका ॥
अम्लवेतसतुल्यांशमम्लोणीद्रवैर्दिनम् ।
भावयेन्मेषशृङ्ग्या च नागवल्ल्या दिनं दिनम् ॥
वटिकां वदरास्थ्याभां नाम्ना चन्द्रप्रभां पराम् ।
भक्षयेत्तीव्रमेहार्त्तः सर्व्वमेहकुलान्तकम् ॥
धात्री पटोलपत्रं वा कषायं वान्दतायुतम् ।
सक्षौद्रं पाययेच्चाशु सर्व्वमेहप्रशान्तये ॥”
इति चन्द्रप्रभावटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)

चन्द्रभागः, पुं, (भज्+भावे घञ् । चन्द्रस्य भागो-विभागो यत्र इति ।) पर्व्वतविशेषः । यथा,—
ऋषय ऊचुः ।
“चन्द्रभागा कथं सिन्धुस्तत्रोत्पन्ना महागिरौ ।
कीदृक् सरस्तद्विप्रेन्द्र ! बृहल्लोहितसंज्ञकम् ॥
कथं स पर्व्वतश्रेष्ठश्चन्द्रभागाख्योऽभवत् ।
चन्द्रभागाख्या कस्मान्नदी जाता शुभोदका ॥
एतन्नः श्रोष्यमाणानां जायते कौतुकं महत् ।
माहात्म्यं चन्द्रभागायाः कासारस्य गिरेस्तदा ॥
मार्कण्डेय उवाच ।
श्रूयतां चन्द्रभागाया उत्पत्तिर्द्विजसत्तमाः ।
युष्माभिश्चन्द्रभागस्य माहात्म्यं नामकारणम् ॥
हिमवद्गिरिसंसक्तशतयोजनविस्तृतः ।
योजनत्रय उच्छ्रायः कुन्देन्दुधवलो गिरिः ॥
तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुद्धं सुधानिधिम् ।
विभज्य कल्पयामास देवार्थं स पितामहः ॥
पित्रर्थञ्च तथा तस्य तिथिवृद्धिक्षयात्मकम् ।
कल्पयामास जगतां हिताय कमलासनः ॥
विभक्तश्चन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे ।
अतो देवाश्चन्द्रभागं नाम्ना चक्रुः पुरा गिरिम् ॥”
इत्यादि कालिकापुराणे २० अध्यायः ॥

चन्द्रभागा, स्त्री, (चन्द्रभागः पर्व्वतविशेषः स उत्पत्तिस्थानत्वेनास्त्यस्याः । “अर्श आदिभ्योऽच् ।” ५ । २ । १२७ । इत्यच् ततष्टाप् । चन्द्रभागात् पर्व्वतविशेषात् जाता इति वा ।) नदीविशेषः । इत्यमरः । १ । १० । ३४ ॥ तत्पर्य्यायः । चन्द्रभागी २ चन्द्रिका ३ । इति शब्दरत्नावली ॥ सा तु काश्मीरदेशे प्रसिद्धा । तस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
“यत्र देवसभा भूता सानौ तस्य महागिरेः ।
तत्र जाता देवनदी शीताख्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं शीतातोयैर्म्मनोहरैः ।
चन्द्रं प्रपुत्रेश्चवाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा शीताजलं चन्द्रस्नानयोगाच्च साम्प्रतम् ।
भूत्वा निपतितं तस्मिन् बृहल्लोहितसंज्ञके ॥
तद्विशुद्धं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्दर्श स्वयं ब्रह्मा विशुद्धं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ॥
भार्य्यार्थं सागरस्तान्तु जग्राह ब्रह्मसम्मते ।
तत्रैवाधिष्ठितं तोयं गदाग्रेण निशापतिः ॥
निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहयत् ।
तत् साम्प्रतजलं भित्त्वा बृहल्लोहितसंज्ञकम् ॥
कासारं सागरं जातं चन्द्रभागा नदी तु सा ।
सागरोऽपि तदा भार्य्यां चन्द्रभागां महानदीम् ॥
तेन तोयप्रवाहेण निनाय भवनं स्वकम् ।
एवं तस्मिन् समुत्पन्ना चन्द्रभागाख्या नदी ॥
चन्द्रभागे महाशैले गुणैर्गङ्गासमा सदा ।”
इति कालिकापुराणे २२ अध्यायः ॥
अस्या जलस्य गुणाः । सुशीतलत्वम् । दाहपित्तवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रभागी, स्त्री, (चन्द्रभागस्य तदाख्यया प्रसिद्धस्य पर्व्वतस्य इयम् । चन्द्रभागपर्व्वतसञ्जातत्वात्तथात्वम् । चन्द्रभाग+“तस्येदम् ।” ४ । ३ १२० ॥ इत्यण् । अत्र न वृद्धिः । ततः “वक्रादिभ्यश्च ।” ४ । १ । ४५ । इति ङीष् ।) चन्द्रभागानदी । इति शब्दरत्नावली ।

चन्द्रभूति, स्त्री, (चन्द्रस्येव शुक्ला भूतिः सम्पत् कान्तिरिति यावत् यस्य । चन्द्रवत् शुभ्रदीप्तितयास्य तथात्वम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

चन्द्रमणिः, पुं, (चन्द्रप्रियश्चन्द्रकान्त इत्यर्थः मणिः । शाकपार्थिववत् समासः ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४ । १३३ ॥

चन्द्रमण्डलं, क्ली, (चन्द्रस्य मण्डलम् ।) चन्द्रविम्बम् । चन्द्रपरिवेशः ॥ (यथा, गोः रामायणे ।५।३२।४८।
“तस्याश्च विमलं वक्त्रं सुदन्तं सुगुणैर्युतम् ।
यथा राहुविनिर्मुक्तमभवच्चन्द्रमण्डलम् ॥”)

चन्द्रमाः, [स्] पुं, (चन्द्रमानन्दं मिमीते यद्वा चन्द्रं कर्पूरं सादृश्येन माति परिमातीति । मा+“चन्द्रे मो डित् ।” उणां । ४।२२८ । इति असिः स च डित् । चन्द्रं रजतं अमृतञ्च तदिव मीयते चन्द्र इति वा मीयते इति दासीभारादित्वात् पूर्व्वपदप्रकृतिस्वरत्वं इति दुर्गादासः ।) चन्द्रः । इत्यमरः । १ । ३ । १३ ॥ (यथा, पञ्चतन्त्रे । ३।६८
“एकोऽपि कोऽपि सेव्यो यः क्षीणं क्षीणं पुनर्नवम् ।
अनुद्विग्नः करोत्येव सूर्य्यश्चन्द्रमसं यथा ॥”)

चन्द्रमौलिः, पुं, (चन्द्रः मौलौ शेखरे यस्य ।) शिवः । इति हारावली । ८ ॥ (यथा, कुमारे । ५ । ८६ ।
“अद्य प्रभृत्यवनताङ्गि ! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ॥”)

चन्द्ररेखा, स्त्री, (चन्द्रस्य रेखा इव आकृतिर्यस्याः ।) वाकुची । इति भैषज्यरत्नावली ॥ हाकुच इति भाषा ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठाधिकारे ।
“गुडुची चन्द्ररेखा च सोमराट् चक्रमर्द्दकम् ॥”
वाकुचीशब्दे विवरणमस्या ज्ञातव्यम् ॥)

चन्द्ररेणुः, पुं, (चन्द्र आह्लादको रेणुर्यत्र ।) काव्यचौरः । इति त्रिकाण्डशेषः ॥

चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृतिर्यस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ (अप्सरोविशेषः । यथा, काशीखण्डे । ६ । ७ ।
“उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा ॥”
छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
“म्रौ मो यौ चेद्रवैर्ता सप्ताष्टकैश्चन्द्रलेखा ॥”)

चन्द्रलोहकं, क्ली, (चन्द्र इव शुभ्रं लोहकं धातुद्रव्यम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

चन्द्रवंशः, पुं, (चन्द्रस्य वंशः अन्ववायः ।) चन्द्रसन्तानः । यथा । ब्रह्मणः पुत्रः अत्रिः तस्य पुत्रश्चन्द्रः तस्य बुधः तस्य वैवस्वतमनुकन्यायां इलायां भार्य्यायां पुरूरवाः स प्रतिष्ठाननगरे इदानीं विठोरसंज्ञे राजचक्रवर्त्ती आसीत् । तस्योर्व्वश्यां षट् पुत्रा आसन् तेषां आयुर्ज्येष्ठः । तस्य पुत्रो नहुषस्तस्य ययातिश्चक्रवर्त्ती । तस्य द्वे भार्य्ये वृषपर्व्वणो दानवराजस्य सुता शर्म्मिष्ठा शुक्रस्य कन्या देवयानी च । देवयान्यां ययातेर्द्वौ पुत्रौ यदुस्तुर्व्वसुश्च । शर्म्मिष्ठायां त्रयः पुत्राः द्रुह्युः अनुः पूरुश्च । तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाहेलनं कृतवन्तः पित्रा शप्ताः । ज्येष्ठपुत्रं यदुं शशाप तव वंशे राजचक्रवर्त्ती माभूत् । तुर्व्वसुद्रुह्यूनू शशाप युष्माकं वंश्या वेदवाह्या म्लेच्छा भविष्यन्ति । पूरुस्तु पितुराज्ञया दुष्करं कर्म्म कृत्वा पितुरतिप्रिय आसीत् । ययातिः स्वमरणसमये कनिष्ठपुत्रं पूरुं राजचक्रवर्त्तिनं कृतवान् । यदवे दक्षिणस्यां दिशि किञ्चिद्राज्यखण्डं दत्तवान् । तथा द्रुह्यवे पूर्व्वस्यां दिशि, पश्चिमायां तुर्व्वसवे, उत्तरस्यां अनवे, सर्व्वान् पूरोरधीनांश्चक्रे । यदुरतीवधर्म्मशीलस्तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः । तच्चरितं सर्व्वशास्त्रप्रसिद्धम् ॥ (अधुना यदोर्वंश उच्यते । यदोः पुत्रः क्रोष्टा (क्रोष्टु) तस्य वृजिनिवान् तस्य स्वाहिः तस्य उशङ्गुः तस्य चित्ररथः तस्य शशविन्दुः तस्यः पृथुकीर्त्तिः पृथुजयः पृथुदानः पृथुश्रवा इति चत्वारः पुत्त्राः । पृथु-